नं० ५१२८

नाम – पञ्चाङ्ग रुद्राणां न्यासपूर्वको जप होमार्चन विधिः

कर्ता — ×

पत्र संख्या – २० पत्राणि सं० — ×

विषयः – सूत्रपद्धतिः

© Dharmartha Trust J&K. Digitized by eGangotri

पंचांगरुद्रन्यासपूर्वजपहोमार्चनविधिः

५१२८

5128/10

© Dharmartha Trust J&K. Digitized by eGangotri

घृणेमुर्द्विजपुंगवाः ॥४॥ पपात दंडवद्भूमौ दृष्ट्वा सोरोमहर्षणिः ॥ प्रणम्य त्रिः रस
यं चांजलिः पार्श्वगोऽभवत् ॥५॥ दृष्ट्वा तेनामयं विप्राः शौनकाद्या महामु ॥
समाख्यास्यासनं तस्मै तद्योग्यं समकल्पयन् ॥६॥ अथैनान्ब्रवीद्वाक्यं
पराशरसुतः प्रभुः ॥ कच्चिन्न हानिस्तपसः स्वाध्यायस्य च तस्य च ॥



© Dharmartha Trust J&K. Digitized by eGangotri

श्रीगणेशाय नमः॥ अथातः पंचांगरुद्राणां न्यासपूर्वकं जपहोमार्चनविधिं व्याख्यास्यामः॥ या
ते रुद्र शिवा तनूरघोरा पापकाशिनी॥ तया नस्तनुवा शंतमया गिरिशंताभिचाकशी
हि॥ शिखायै नमः॥ अस्मिन्महत्यर्णवेंतरिक्षे भवा अधि॥ तेषां सहस्रयोजनेवधन्वा
नितन्मसि॥ शिरसे स्वाहा॥ सहस्राणि सहस्रशो ये रुद्रा अधि भूम्यां॥ तेषां सहस्रयो
जनेवधन्वानितन्मसि॥ ललाटाय नमः॥ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदति
थिर्दुरोणसत्॥ नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥ भ्रुवोर्म
पच्यास व ध्याय नमः॥ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं॥ उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय
मामृतात्॥ नेत्राभ्यां नमः॥ नमः स्तुत्याय च॥ कर्णाभ्यां नमः॥ मा नस्तोके तनये मा न आ
युषि मा नो गोषु मा नो अश्वेषु रीरिषः॥ वीरान्मा नो रुद्र भामितो वधीर्हविष्मंतो नमसा वि २
धेम ते॥ नासिकायै नमः॥ अवतत्य धनुस्त्वं सहस्राक्ष शतेषुधे॥ निशीर्य शल्यानां मु

© Dharmartha Trust J&K. Digitized by eGangotri

स्वास्त्रिवो नः सुमना भव ॥ मुखाय नमः ॥ नीलग्रीवाः शितिकंठाः शर्वा अधः क्षमाचराः ॥ ते
षां सहस्रयोजने व धन्वानि तन्मसि ॥ कंठाय नमः ॥ नीलग्रीवाः शितिकंठा दिवं रुद्रा उप
श्रिताः ॥ तेषां सहस्रयोजनेव धन्वानि तन्मसि ॥ उपकंठाय नमः ॥ नमस्ते अस्त्वायुधाया
नातताय धृष्णवे ॥ उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥ बाहुभ्यां नमः ॥ या ते हेति
र्मीढुष्टम हस्ते बभूव ते धनुः ॥ तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज ॥ उपबाहुभ्यां न
मः ॥ ये तीर्थानि प्रचरंति सृकावंतो निषंगिणः ॥ तेषां सहस्रयोजनेव धन्वानि तन्म
सि ॥ हस्ताभ्यां नमः ॥ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ॥ भवे भवे नातिभ
वे भजस्व मां भवोद्भवाय नमः ॥ अंगुष्ठाभ्यां नमः ॥ वामदेवाय नमो ज्येष्ठाय नमः श्रे प
ष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो ब य
लाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥ तर्ज

© Dharmartha Trust J&K. Digitized by eGangotri

नीभ्यां नमः ॥ अघोरेभ्योथघोरेभ्यो घोरघोरतरेभ्यः ॥ सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रु
द्ररूपेभ्यः ॥ मध्यमाभ्यां नमः ॥ तत्पुरुषाय विद्महे महादेवाय धीमहि ॥ तन्नो रुद्रः प्रचोदया
त् ॥ अनामिकाभ्यां नमः ॥ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिप
तिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ कनिष्ठिकाभ्यां नमः ॥ नमो वः किरिकेभ्यो देवानां
हृदयेभ्यः ॥ हृदयाय नमः ॥ नमो गणेभ्यो गणपतिभ्यश्च वो नमः ॥ पृष्ठ्यै नमः ॥ नमो हिरण्य
बाहवे सेनान्ये दिशां च पतये नमः ॥ पार्श्वाभ्यां नमः ॥ विज्यं धनुः कपर्दिनो विशल्यो बाणवा
ण्वाँ उत ॥ अनेशन्नस्येषव आभुरस्य निषंगधिः ॥ जठराय नमः ॥ हिरण्यगर्भः समवर्त
ताग्रे भूतस्य जातः पतिरेक आसीत् ॥ स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा वि
धेम ॥ नाभ्यै नमः ॥ मीढुष्टम शिवतम शिवो नः सुमना भव ॥ परमे वृक्ष आयुधं निधाय २
कृत्तिं वसान आचर पिनाकं बिभ्रदागहि ॥ कट्यै नमः ॥ ये भूतानामधिपतयो विशिखा

© Dharmartha Trust J&K. Digitized by eGangotri

सः कपिर्द्दिनः ॥ तेषा ँ सहस्रयोजनेव धन्वानि तन्मसि ॥ गुह्याय नमः ॥ अग्निराजातवेदाः ॥
अद्दारब्रह्मसंमितं ॥ वेदाना ँ शिर उत्तमं ॥ जातवेदसे शिरसा माता ॥ स्वयंब्रह्मन्नह्सुवः सु
वर्णं ॥ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ॥ स नः पर्षदति दुर्गाणि विश्वाना
वेव सिन्धुं दुरितात्यग्निः ॥ तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टां ॥ दुर्गां देवी
ँ शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥ अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति दु
र्गाणि विश्वा ॥ पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥ विश्वानि नो दुर्गहा
जातवेदः सिन्धुं न नावा दुरितातिपर्षि ॥ अग्ने अत्रिवन्मनसा गृणानो ऽस्माकं बोध्यवि
ता तनूनां ॥ पृतनाजित ँ सहमानमुग्रमग्नि ँ हुवेम परमात्सधस्थात् ॥ स नः पर्ष
दति दुर्गाणि विश्वा क्षामद्देवो अति दुरितात्यग्निः ॥ अपानाय नमः ॥ मानो महान्तमुत मा

© Dharmartha Trust J&K. Digitized by eGangotri

नोऽअर्भकं मानउक्षंतमुतमानउक्षितं॥ मानोवधीः पितरंमोतमातरंप्रिया मानस्तनुवो रुद्ररीरिषः॥ ऊरुभ्यांनमः॥ एषतेरुद्रभागस्तंजुषस्वतेनावसेनपरोमूजवतोतीह्यव
ततधन्वापिनाकहस्तः कृत्तिवासाः॥ जानुभ्यांनमः॥ संसृष्टजित्सोमपाबाहुश
र्ध्यूर्ध्वधन्वाप्रतिहिताभिरस्ता॥ बृहस्पतेपरिदीयारथेनरक्षोहामित्राँ२अपबा
धमानः॥ जंघाभ्यांनमः॥ विश्वंभूतंभुवनंचित्रंबहुधाजातंजायमानंचयत्॥ सर्वो
ह्येषरुद्रस्तस्मैरुद्रायनमोऽस्तु॥ गुल्फाभ्यांनमः॥ येपथांपथिरक्षयऐलबृदा
यव्युधः॥ तेषांसहस्रयोजनेवधन्वानितन्मसि॥ पादाभ्यांनमः॥ अध्यवो
चदधिवक्ताप्रथमोदैव्योभिषक्॥ अहींश्चसर्वाञ्जम्भयन्त्सर्वाश्चयातुधान्यः॥
कवचायहुं॥ नमोबिल्मिनेचकवचिनेच॥ एकवचायहुं॥ नमोऽस्तुनीलग्रीवा २
यसहस्राक्षायमीढुषे॥ अथोयेअस्यसत्वानोहंतेभ्योकरंनमः॥ तृतीयनेत्रायनमः

© Dharmartha Trust J&K. Digitized by eGangotri

प्रमुंच धन्वनस्त्वमुभयोरार्त्नियोर्ज्यां॥ याश्चते हस्त इषवः परा ता भगवो वप॥ अस्त्राय
फट्॥ यशतावंत चक्रूया७ सच्चक्षुरिश्चो रुद्रा वितस्थिरे॥ तेषा७ सहस्रयोजनेव धन्वा
नितन्मसि॥ इति दिग्बंधः॥ नमो भगवते रुद्रायेति नमस्कारं न्यसेत्॥ ॐ मूर्ध्ने नमः॥ नं
नासिकायै नमः॥ मों ललाटाय नमः॥ भं मुखाय नमः॥ गं कंठाय नमः॥ वं हृदयाय नमः॥
तें दक्षिणहस्ताय नमः॥ रूं वामहस्ताय नमः॥ द्रां नाभ्यै नमः॥ यं पादाभ्यां नमः॥ सद्यो
जातं प्रपद्यामि सद्योजाताय वै नमो नमः॥ भवे भवे नातिभवे भवस्व मां भवोद्भवाय न
मः॥ पादाभ्यां नमः॥ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः काला
य नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः
सर्वभूतदमनाय नमो मनोन्मनाय नमः॥ ऊरुमध्याय नमः॥ अघोरेभ्योऽथ घोरे
भ्यो घोरघोरतरेभ्यः॥ सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥ हृदयाय नमः॥

© Dharmartha Trust J&K. Digitized by eGangotri

तत्पुरुषाय विद्महे महादेवाय धीमहि॥ तन्नो रुद्रः प्रचोदयात्॥ मुखाय नमः॥ ईशानः
सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु
सदाशिवों॥ मूर्ध्ने नमः॥ इ७ सइ७ सेति यो ब्रूयात् हंसो नाम सदाशिवः॥ एवं न्यासवि
धिं चात ततः संपुटमारभेत्॥ त्रातारमिंद्रमवितारमिंद्र७ हवे हवे सुहव७ शूरमिं
द्रं॥ हुवेनु शक्रं पुरुहूतमिंद्र७ स्वस्ति नो मघवा धात्विंद्रः॥ इंद्राय नमः॥ त्वं नो अ
ग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः॥ यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वे
षा७ सि प्रमुमुग्ध्यस्मत्॥ अग्नये नमः॥ सुगं नः पंथामभयं कृणोतु यस्मिन्नक्षत्रे
यम एति राजा॥ यस्मिन्नेनमभ्यषिंचं त देवाः तदस्य चित्र७ हविषा यजाम॥ यमाय
नमः॥ असुन्वंतमयजमानमिच्छ स्तेनस्येत्यां तस्करस्यान्वेषि॥ अन्यमस्मदिच्छ सा त इ ८
त्या नमो देवि निर्ऋते तुभ्यमस्तु॥ निर्ऋतये नमः॥ तत्वायामि ब्रह्मणा वंदमानः तदाशा

© Dharmartha Trust J&K. Digitized by eGangotri

स्ते यजमानो हविर्भिः ॥ अहेडमानो वरुणेह बोध्युरुश७ समान आयुः प्रमोषीः ॥
वरुणाय नमः ॥ आ नो नियुद्भिः शतिनीभिरध्वर७ सहस्रिणीभिरुप याहि यज्ञं ॥ वायो
अस्मिन्वायविषि मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥ वायवे नमः ॥ वय७ सोम व्र
ते तव मनस्तनूषु बिभ्रतः ॥ प्रजावन्तो अशीमहि ॥ सोमाय नमः ॥ तमीशानं जगतस्त
स्थुषस्पतिं धियंजिन्वमवसे हूमहे वयं ॥ पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्ध
स्वस्तये ॥ ईशानाय नमः ॥ अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ॥ यः
श७सते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ७ अवन्तु देवाः ॥ आकाशाय नमः ॥ स्योना
पृथिवी नो भवानृक्षरा निवेशनी ॥ यच्छा नः शर्म सप्रथाः ॥ पृथिव्यै नमः ॥ एतत्संपुटमिष्टा
दीहि तु विन्यस्य एवमेवात्मनि शोढीकरणं कृत्वा गच्छति गतैः पापैः प्रमुच्यते सर्वन्नूते

© Dharmartha Trust J&K. Digitized by eGangotri

ब्रपराजितोन्नवतिततोच्चूतप्रेतपिशाचब्रह्मराक्षसयक्षयमदूतशाकिनीडाकिनीसर्प
श्वापदतस्कराद्युपद्रवाद्युपघाताः सर्वेज्वलंतंपरियंतु । मा ७ रक्षंतु ॥ मनोज्योतिर्जु
षतामाज्यंविछिन्नंयज्ञ ७ समिमंदधातु ॥ याइष्टाउषसोनिम्रुचश्चतास्संदधामिहवि
षाघृतेन ॥ गुह्याय नमः ॥ अबोध्यग्निस्समिधाजनानांप्रतिधेनुमिवायतीमुषासं ।
व यह्वाइवप्रवयामुज्जिहानाःप्रभानवःसिस्रतेनाकमछ ॥ उदराय नमः ॥ मूर्द्धानंदि
वोअरतिंपृथिव्यावैश्वानरमृतायजातमग्निं ॥ कवि ७ सम्राजमतिथिंजनानामास
न्नापात्रंजनयंतदेवाः ॥ हृदयाय नमः ॥ मर्माणितेवर्मणाछादयामिसोमस्त्वाराजामृते
नान्विवस्तां ॥ उरोर्वरीयोवरिवस्तेअस्तुजयंतंत्वामनुमदंतुदेवाः ॥ मुखाय नमः ॥ जा
तवेदायदिवापावकोसि ॥ वैश्वानरोयदिवावैद्युतोसि ॥ शंप्रजाभ्योयजमानायलोकं । ५

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ ग्रं पुष्टिं दददन्त्या वषट् स्वाहा॥ शिरसे स्वाहा॥ आत्मरक्षा कर्तव्या॥ यज्जाग्रतो दूरमुदैति दैवं त
दु सुप्तस्य तथैवैति॥ दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु॥ येन कर्माण्य
पसो मनीषिणो यज्ञे कृण्वंति विदथेषु धीराः॥ यदपूर्वं यक्षमंतः प्रजानां तन्मे मनः शिवसं
कल्पमस्तु॥ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरंतरमृतं प्रजासु॥ यस्मान्न ऋते किंच
न कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु॥ येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन
सर्वं॥ येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसंकल्पमस्तु॥ यस्मिन्नृचः साम यजूं
षि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः॥ यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे
मनः शिवसंकल्पमस्तु॥ सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेभीशुभिर्वाजिन इव॥
हृत्प्रतिष्ठं यदजिरं यविष्ठं तन्मे मनः शिवसंकल्पमस्तु॥ ॐ नमो भगवते रुद्राय शिवसं
कल्पं हृदयाय नमः॥ सहस्रशीर्षा पुरुषः॥ सहस्राक्षः सहस्रपात्॥ स भूमिं विश्व

© Dharmartha Trust J&K. Digitized by eGangotri

नोरुचो। अत्यतिष्ठद्दशांगुलं। पुरुष एवेदꣳ सर्वं। यद्भूतं यच्च भव्यं। उतामृतत्वस्येशानः। यदन्ने
नातिरोहति। एतावानस्य महिमा। अतो ज्यायाꣳश्च पूरुषः। पादोस्य विश्वा भूतानि। त्रिपादस्या
मृतं दिवि। त्रिपादूर्ध्व उदैत्पूरुषः। पादोस्येहाभवत्पुनः। ततो विष्वङ्व्यक्रामत्। साशनानश
ने अभि। तस्माद्विराडजायत। विराजो अधिपूरुषः। स जातो अत्यरिच्यत। पश्चाद्भूमिमथो पुरः।
यत्पुरुषेण हविषा। देवा यज्ञमतन्वत। वसंतो अस्यासीदाज्यं। ग्रीष्म इध्मः शरद्धविः। सप्ता
स्यासन्परिधयः। त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वानाः। अबध्नन्पुरुषं पशुं। तं यज्ञं
बर्हिषि प्रौक्षन्। पुरुषं जातमग्रतः। तेन देवा अयजंत। साध्या ऋषयश्च ये। तस्माद्यज्ञा
त्सर्वहुतः। संभृतं पृषदाज्यं। पशूꣳस्ताꣳश्चक्रे वायव्यान्। आरण्यान्ग्राम्याश्च ये। तस्माद्यज्ञा
त्सर्वहुतः। ऋचः सामानि जज्ञिरे। छंदाꣳसि जज्ञिरे तस्मात्। यजुस्तस्मादजायत। तस्मा
दश्वा अजायंत। ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्। तस्माज्जाता अजावयः॥ ६
यत्पुरुषं व्यदधुः। कतिधा व्यकल्पयन्। मुखं किमस्य कौ बाहू। कावूरू पादावुच्येते॥

© Dharmartha Trust J&K. Digitized by eGangotri

ब्राह्मणोस्य मुखमासीत् । बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजा
यत । चन्द्रमा मनसो जातः । चक्षोः सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजा
यत । नाभ्या आसीदन्तरिक्षं । शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्त
था लोकां अकल्पयन् । वेदाहमेतं पुरुषं महान्तं । आदित्यवर्णं तमसस्तु पारे । सर्वा
णि रूपाणि विचित्य धीरः । नामानि कृत्वाभिवदन्यदास्ते । धाता पुरस्ताद्यमुदाजहार ।
शक्रः प्रविद्वान्प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय वि
द्यते । यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः स
चन्ते । यत्र पूर्वे साध्याः सन्ति देवाः । ॐ नमो भगवते रुद्रायेति पुरुषसूक्तं ६ त्रिष्टुभस्वाहा ।
अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताधि । तस्य त्वष्टा विदधद्रूपमेति ।

© Dharmartha Trust J&K. Digitized by eGangotri

विष्णु तत्पुरुषस्यैमाजानमग्रे। वेदाहमेतं पुरुषं महांतं। आदित्यवर्णं तमसः परस्तात्। तमेवं विद्वान्
मृत इह भवति। नान्यः पंथा विद्यतेयनाय। प्रजापतिश्चरति गर्भे अंतः। अजायमानो बहुधा विजाय
ते। तस्य धीराः परिजानंति योनिं। मरीचीनां पदमिच्छंति वेधसः। यो देवेभ्य आतपति। यो देवानां पु
रोहितः। पूर्वो यो देवेभ्यो जातः। नमो रुचाय ब्राह्मये। रुचं ब्राह्मं जनयंतः। देवा अग्रे तदब्रुवन्।
यस्त्वैवं ब्राह्मणो विद्यात्। तस्य देवा असन्वशे। ह्रीश्च ते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे। नक्ष
त्राणि रूपं। अश्विनौ व्यात्तं। इष्टं मनिषाण। अमुं मनिषाण। सर्वं मनिषाण। ॐ नमो भगवते रुद्रा
येति उत्तरनारायण ७ त्रिरवायैवषट्॥ आशुः शिशानो वृषभो न युध्मो घनाघनः क्षोभ
णश्चर्षणीनां। संक्रंदनोनिमिष एकवीरः शतं सेना अजयत्साकमिंद्रः। संक्रंदनेना
निमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना। तदिंद्रेण जयत तत्सहध्वं युधो नर इ ७

© Dharmartha Trust J&K. Digitized by eGangotri

पुरुहूतेन वृष्णा । स इषुहस्तैः स निषंगिभिर्वशी सं७स्रष्टा स युध इंद्रो गणेन । सं७सृष्टजित्सोमपा
बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता । बृहस्पते परि दीया रथेन रक्षोहामित्राँ७ अपबाधमानः ।
प्रभंजन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानां । गोत्रभिदं गोविदं वज्रबाहुं जयंत
मज्म प्रमृणंतमोजसा । इमं७ सजाता अनु वीरयध्वमिंद्रं७ सखायो अनु सं७रभध्वं । बलविज्ञायः
स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः । अभिवीरो अभिसत्वा सहोजा जैत्रमिंद्र रथमा तिष्ठ
गोवित् । अभि गोत्राणि सहसा गाहमानोऽदायो वीरः शतमन्युरिंद्रः । दुश्च्यवनः पृतनाषाडयुध्योऽस्मा
कं सेना अवतु प्र युत्सु । इंद्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः । देवसेनाना
मभिभंजतीनां जयंतीनां मरुतो यंत्वग्रं । इंद्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां७ शर्
ध उग्रं । महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् । अस्माकमिंद्रः समृते

© Dharmartha Trust J&K. Digitized by eGangotri

पूषध्वजे घस्मा कं याइषवस्ता ओयं तु। अस्माधीया ७ तेरित्रवं वस्मां तु देवा॥ ७ वनाइवे
षा ७ र्दर्षयमघवन्नायुधान्युत्सावीनां मामकानां मनांसि ॥ ७ सि ॥ ७ दृत्रइ न्वाजिनां वाजिनां
न्युइयानां जयतामेतु घोषः ॥ ७ मा के त जयतानरः स्थिरा वः संतु बाहवः ॥ इंद्रो वः शर्म यच्छ
९ तु नाधृष्या यथासथ ॥ अवसृष्टा परापत शरव्ये ब्रह्मसंशिते ॥ ७ गच्छामित्रान्प्र विशा
मैषां कंचनोच्छिषः ॥ मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानुवस्तां ॥ उरो
र्वरीयो वरिवस्ते अस्तु जयंतं त्वामनु मदंतु देवाः ॥ यत्र बाणाः संपतंति कुमारा विशिखा इवा
इं वा इंद्रो नः स्तत्र वृत्रहा विश्वाहा शर्म यच्छतु ॥ ७ ओं नमो भगवते रुद्राय ॥ अप्रतिरथकवचा
यडुं वर्म येन रुद्रा अस्ते रोम सेंद्रा दिवः ॥ व ७ शाद्वी मारुतं तद्वद्वइ इंद्रो विषे ॥ चं वातैरस्तु र्णोर्यो
सि शं गयस्य वं पूषा विधत्तः पासि नुत्मना इंद्रे वा दिवेषु ॥ अयमद्यं ॥ अयं माद्वितीयेषु अय ८

© Dharmartha Trust J&K. Digitized by eGangotri

ध्वं। द्वितीयास्तृतीयेषु श्रयध्वं। तृतीयाश्चतुर्थेषु श्रयध्वं। चतुर्थाः पंचमेषु श्रयध्वं। पंचमाः ष
ष्ठेषु श्रयध्वं। षष्ठाः सप्तमेषु श्रयध्वं। सप्तमा अष्टमेषु श्रयध्वं। अष्टमा नवमेषु श्रयध्वं॥
नवमा दशमेषु श्रयध्वं। दशमा एकादशेषु श्रयध्वं। एकादशा द्वादशेषु श्रयध्वं। द्वादशा
स्त्रयोदशेषु श्रयध्वं। त्रयोदशाश्चतुर्दशेषु श्रयध्वं। चतुर्दशाः पंचदशेषु श्रयध्वं। पंचदशाः
षोडशेषु श्रयध्वं। षोडशाः सप्तदशेषु श्रयध्वं। सप्तदशा अष्टादशेषु श्रयध्वं। अष्टादशा ए
कान्नविंशेषु श्रयध्वं। एकान्नविंशा विंशेषु श्रयध्वं। विंशा एकविंशेषु श्रय
ध्वं। एकविंशा द्वाविंशेषु श्रयध्वं। द्वाविंशास्त्रयोविंशेषु श्रयध्वं। त्रयोविंशा
श्चतुर्विंशेषु श्रयध्वं। चतुर्विंशाः पंचविंशेषु श्रयध्वं। पंचविंशाः षड्विंशेषु श्र

© Dharmartha Trust J&K. Digitized by eGangotri

षड्विंशाः सप्तविंशेषु श्रयध्वं। सप्तविंशा अष्टाविंशेषु श्रयध्वं। अष्टाविंशा ए-
कान्नत्रिंशेषु श्रयध्वं। एकान्नत्रिंशास्त्रिंशेषु श्रयध्वं। त्रिंशा एकत्रिंशेषु श्रय-
ध्वं। एकत्रिंशा द्वात्रिंशेषु श्रयध्वं। द्वात्रिंशास्त्रयस्त्रिंशेषु श्रयध्वं। देवास्त्रिरेकादशास्त्रि-
१ स्त्रयस्त्रिंशाः। उत्तरे भवत। उत्तरवर्त्मान उत्तरसत्वानः। यत्काम इदं जुहोमि। तन्मे सं-
मृध्यतां वयं स्याम पतयो रयीणां। भूर्भुवः स्वः स्वाहा। अस्त्राय फट्।। हिरण्यगर्भः
समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै दे-
वाय हविषा विधेम। यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव। य ईशे अ-
स्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम। ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि- ८
सीमतः सुरुचो वेन आवः। स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च

© Dharmartha Trust J&K. Digitized by eGangotri

विवः। मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां। पिपृतान्नो भरीमभिः। उपश्वासय पृ
थिवी मुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत्। स दुंदुंभे सजूरिन्द्रेण देवैर्दूराद्दवीयो
अपसेध शत्रून्। —न्ते न यस्य पथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्। युयु
ध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम। या ते अग्ने यज्ञिया तनूस्तये ह्यारो
हात्मात्मानं अच्छा वसूनि कृण्वन्नस्मे नर्या पुरूणि। यज्ञो भूत्वा यज्ञमासीद स्वां यो
निं। जातवेदो भुव आजायमानः स क्षय एहि। इमं यम प्रस्तरमाहि सीदांगिरोभिः पितृ
भिः संविदानः। आ त्वा मंत्राः कविशस्ता वहंत्वेना राजन्हविषा मादयस्व। —नने ब्रह्मा
तिष्ठतु। पादयोर्विष्णुस्तिष्ठतु। हस्तयार्हरिस्तिष्ठतु। बाह्वोरिंद्रस्तिष्ठतु। जठरे अग्निस्ति
ष्ठतु। हृदये शिवस्तिष्ठतु। कंठे वसवस्तिष्ठंतु। वक्त्रे सरस्वती तिष्ठतु। नासिकयो

© Dharmartha Trust J&K. Digitized by eGangotri

वायुस्तिष्ठतु। नयनयोश्चंद्रादित्यौ तिष्ठेतां कर्णयोरश्विनौ तिष्ठेतां। जानौ टंकेशरास्ति
ष्ठंतु। मूर्ध्न्यादित्यास्तिष्ठंतु। शिरसि महादेवस्तिष्ठतु। शिखायां वासुदेवस्तिष्ठतु। पृष्ठे
पिनाकी तिष्ठतु। पुरतः शूली तिष्ठतु। पार्श्वयोः शिवशंकरौ तिष्ठेतां। सर्वतो वायुस्तिष्ठतु।
ततो बहिः सर्वतोग्निर्ज्वालामालापरिवृतस्तिष्ठतु। सर्वेष्वंगेषु सर्वदेवता यथास्थानं ति
ष्ठंतु। मां रक्षंतु। अग्निर्मे वाचि श्रितः। वाग्हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्म
णि। वायुर्मे प्राणे श्रितः। प्राणो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। सूर्यो
मे चक्षुषि श्रितः। चक्षुर्हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। चंद्रमा मे म
नसि श्रितः। मनो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। दिशो मे श्रोत्रे श्रि १०
ताः। श्रोत्रं हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। आपो मे रेतसि श्रिताः।

© Dharmartha Trust J&K. Digitized by eGangotri